E-ISSN-2584-2870 DOI: https://doi.org/10.65833/dbs.2026.015

देवभूमि-सौरभम्
Devabhūmisaurabham

Vol 2 Issue 2 July-Dec 2025 Devabhūmisaurabham International Journal of CSU Shri Raghunath Kirti Campus Devprayag Uttarakhand India

# बालरामायणस्य काव्य-सौष्ठवममरत्वञ्च।

**शोध छात्रः**
**स्वागत मेहेरः**
**श्रीरघुनाथकीर्तिपरिसरः**
**केंद्रीयसंस्कृतविश्वविद्यालयः,देवप्रयागः।**

**शोधसारः**

भारतीयसाहित्ये बालरामायणमिति काचित् अद्वितीया नाट्यकाव्यमयी च कृतिः दृश्यते, या पाठ्य-नाट्य-रूपयोरैक्येन समलङ्कृता वर्तते । कृतिरस्याः भाषासंरचना, छन्दलालित्यम्, अलङ्कारवैभवम्, रसगौरवश्चविशिष्टं काव्यमाधुर्यं समुपजनयन्ति। अस्याः कथायाः सार्वकालिकताअमरत्वस्य प्रधानहेतवः धार्मिकसांस्कृतिकभावगौरवंमञ्चाभिनयं जीवन्माधुर्यमिति च। एवं सा काव्यकृतिः साहित्यशास्त्रस्य रससम्पन्नतां नाट्यस्य च प्रभावोत्पादकतां सुसम्बद्ध्य भारतस्य काव्य-नाट्य-परम्परायाःवैलक्षण्यं चिरस्मरणीयपदं च समलभते।

**कूटशब्दाः-** बालरामायणं,राजशेखरः,रामः,रावणः,रामायणम् ,रामकथाः ।

**प्रस्तावना -**

संस्कृतसाहित्येतिहासे यायावरवंशोद्भवःप्रभाभास्वरःप्रोज्ज्वलः महाकविराजशेखरः साहित्याकाशे चिरविलासिनां नक्षत्रराज इव दृश्यते, यस्य यशोविभूतिः साहित्यवाङ्मयभूमेः सर्वानेव प्रदेशान् सम्यगालोकयति। स हि साहित्यशास्त्रस्यमहनीयः प्रणेता, नाट्यविद्यायाः परमाचार्यः काव्यछन्दज्योतिषभूगोलादिविविधशास्त्रपारदृश्वा बहुश्रुतः समग्रभारतीयवाङ्मयरत्नाकरस्य मर्मज्ञश्चासीत । तस्य अद्वितीया प्रतिभा न केवलं साहित्यजगतामालोककारिणी जाता, अपि तु तस्य राजनैतिक-प्रशासनपारदर्शितया भारतमहामण्डलमपि मार्गनिर्देशेन सुखसमृद्धिप्रसारस्य साक्षात् प्रतिमानमिवोदीरितम्।

न केवलं ते संस्कृतवाङ्मये चूडान्तविद्वान् , अपि तु प्राकृतभाषायामपि तेषां पूर्णपारदर्शित्वमासीत्। अस्यैव सर्वविद्याविनियोगमहिम्नः साक्ष्यं दत्त्वा तस्य समकालिकः षट्करवर्मा तम् वाल्मीकि-भर्तृमेण्ठ-भवभूतिनां साक्षादवतारमित्युक्त्वा सभासद्भ्यः प्रतिपादयामास,यं प्रशंसापदमात्मनः स्वीकृत्य स्वयं राजशेखरः प्रगीतवान्, उद्धृतवान् च- [1]

**बभूव वल्मीकिभवः कविःस्ततः प्रपेदे भुविभर्तृमेण्ठताम् ।**

**स्थितः पुनर्योभवभूतिरेखया सवर्तते सम्प्रतिराजशेखरः।।'[2]**

संस्कृतसाहित्यनभोमण्डले नक्षत्रसमूह-दीप्तिमिव नाना काव्यरत्नानि दृश्यन्ते, तेषु केचन तादृशानि ज्योतिःपुञ्जानि सन्ति, येषां द्युतिः युगशतान्तरगतापि नापगच्छति । एवं हि प्रकारे महाकविराजशेखरेण प्रणीतं "बालरामायणम्" मेरुश्रृङ्गशिखरस्थितदीप्तमानमणिमिव राराजते ।न केवलं कृतिरियं नाटकशास्त्रस्य लक्षणोपेतं, अपि तु रामकथायाः कलात्मक-परिशीलनमपि शास्त्रदिशां दधाति ।अत्र रसगाम्भीर्यं, नाट्याभिनयमाधुर्यंयुगपत् अनन्यस्मिन्नेव प्रवाहे संगत्य पवित्ररसामृतधारामिव सततं वहति।अस्य नाट्यरत्नस्य परम-विशेषता दशाङ्क-विन्यासः वर्तते।सैष न मात्रं कालक्रम-श्रृङ्खला प्रत्युतः भावतरङ्ग-क्रमः ।यत्रारम्भे जानकीस्वयंवरस्य माधुर्यरसपुञ्जः,मध्ये वनवासवियोगदुःखस्य स्निग्धकरुणार्द्रता,अन्ते च लङ्काविजयराज्याभिषेकयोः तेजःप्रभाभिः शोभितःवीरगौरव-वर्णना विलसति ।प्रत्येकाङ्कः वीणायाः पृथग्भूततारेव शोभते,ये मिलित्वा समग्रसंवादसंरचनायामनुपमं गेयरसप्रवाहं सृजन्ति।राजशेखरस्य प्रबन्धकौशलमनुपमं वर्तते,यत्र घटनाक्रमः न मात्रं पौराणिक-इतिहासानुशासनं,विशेषतः भावानुभवस्य आरोहावरोहसोपानक्रमेणरसपरिपाकस्य सामर्थ्यं धारयति ।

अग्रिमतयाः नाटकेषु तस्य रङ्गमञ्चोपयुक्तता प्रधानहेतुत्वेन गृह्यते,किन्तु "बालरामायणे" महाकविना पाठ्यरसगाम्भीर्यं, नाट्यरसानुभावमाधुर्यञ्चसौष्ठवेन प्रतिपादितम्।यद्यपि अस्य नाटकस्य मञ्चनं कठिनं तथापि पठनेनैव हृदयमान्दोलयति।अस्य संवादाः गाम्भीर्ययुक्ताः, काव्यसौष्ठवसमन्विताः, भावमाधुर्यपूर्णाश्च भवन्ति। एते अलंकारसमन्विताः रमणीयसार्थकशब्दाः पाठकेषु नवरसभावमाधुर्यं च सञ्चारयन्ति,अतः ते पठनावसरे पाठकेन मनसा कल्पित-रंगमञ्चे राम-लक्ष्मण-सीता-हनुमत्-रावणादीन् सजीवभावेन साक्षात्क्रियन्ते।

**काव्यसौष्ठवं चिरस्थायित्वञ्च-**

आत्मैव इह नाटकस्यकाव्यसौष्ठवं वर्तते ।प्रत्येकदृश्ये, संवादे, प्रसङ्गे च पदपरिमार्जनविशुद्धिः, अलङ्कारमणिमुक्तावलिः,छन्दःसंगीतलालित्यं,लंका-अलकावर्णने भवभूतेः नाट्यस्य प्रतिच्छायास्फुटमुपलभते। नाटके अलंकारप्रयोगः चमत्कृतिजनकः,किन्तु न कदापि कृत्रिमः;यथा शरदिन्दोः स्वाभाविकं चन्द्रिकाप्रसरणश्चित्तं आवहति, तथा अस्य नाट्यस्य पद्यमणिमुक्तावलीः। अत्र

---

[1]बालरामायण के राम संस्कृति के दर्पण में। डा.हितेश कुमार चौरै.जवलपुर ।

[2]बालरामायण १/१६

नाटके राजशेखरेण तत्कालीनसामाजीकाचारां राजनैतिकस्थिति-सांस्कृतिकजीवनप्रवाहश्च सूक्ष्मसन्दर्भरुपेण प्रदर्शितः । विवाहविधानं, युद्धनीतिः,राजधर्मः जनजीवनचित्रणमिति सर्वं कथाप्रवाहे एव लघुछायारुपेण उपस्फुरति। अतः ''वालरामायणम्' न मात्रं साहित्यरत्नं वरं युगस्य सास्कृतिकदर्पणं वर्तते। अस्य कृतेः अमरत्वं केवलं कथानके नास्ति, न च पात्र-रुपायणे,किन्तु भावगाम्भीर्ये, भाषाशैल्यां, परिप्रेक्षनवोन्मेषे च निहितम्। राजशेखरेण स्वकीये वालरामायणनाटके घटनानां वर्णनपुरस्सरं भावानुभवस्य आवगाहनमपि सृष्टम्। अत्र सहृदयाः रामकथां श्रृण्वन्तः तां साक्षाद् स्वजीवने स्वयमिति मत्वा अनुभवन्ति। एषः दशाङ्कविन्यासः ग्रन्थः रामकथायाः भिन्नभिन्नाध्याये विभिन्नरसाभावान्निर्दिशति। तद्यथा-प्रारम्भे श्रृङ्गारमाधुर्यरसौ, मध्ये करुणवीररसयोरुत्थानम् , अन्ते च वीररसान्वितः विजयराज्याभिषेक-गौरवम्। अस्य प्रधानरसस्तु वीरः एव, यः सहृदयेषु रसानन्दं प्रसारयति।

**वीररसस्य वर्णनम्-**

**आस्कन्धावधि कण्ठकाण्डविपिने द्राक्चन्द्रहासासिना**

**छेत्तुं प्रक्रमिते मयैव टसिति त्रुट्यच्छिरासन्ततौ।**

**प्रस्मेरं गलिताश्रु गद्गदपदं भुग्नभुवा यद्यभू,**

**द्वेतेष्वेकमपि स्वयं स भगवान् तन्मे प्रमाणं शिवः ॥**[3]

अत्र लङ्काधिपतिः रावणः स्वचन्द्रहासस्य महिमानं प्रकाशयन्, त्रिलोकीं नत्वा भगवन्तशिवं साक्ष्यं करोति।अपि च –

युद्धसमये रामचन्द्रः रावणं प्रति उद्धासते- हे दशानन!अधुनापि न किमपि मङ्गलमपगतं,नीतिमार्गम् अनुसृत्य जनकनन्दिनींसमर्पय। अन्यथा तवभ्रातृणां कण्ठरुधिरेण सिक्ताः मे सायकाः यद्यपि पुनः कार्मुकमारोहन्ति तर्हि तव प्राणविनाशे मम प्रतिज्ञायां नास्ति कश्चिद व्यतिक्रमः।यथा-

**भो लङ्केश्वर! दीयतां जनकजा रामः स्वयं याचते**

**कोऽयं ते मतिविभ्रमः स्मर नयं नाद्यापि किञ्चिद्गतम्।**

**नैवं चेत् खरदूषणत्रिशिरसां कण्ठासृजा पङ्किलः**

**पत्री नैष सहिष्यते मम धनुर्ज्याबन्धबन्धूकृतः ॥**[4]

श्लोकेस्मिन् साक्षात् वीररसस्य वर्णनं द्रष्टुं शक्यते।

---

[3]बालरामायण। २.३१

[4]बालरामायण । ९.१९

**श्रृङ्गाररसस्यवर्णनम् -**

**इन्दुर्लिप्त इवाञ्जनेन जडिता दृष्टिर्मृगीणामिव**

**प्रम्लानारुणिमेव विद्रुमलता श्यामेवहेमद्युतिः ।**

**पारुष्यं कलया चकोकिलवधू कण्ठेष्विव प्रस्तुतं**

**सीतायाः पुरतश्च हन्त शिखिनां बर्हाः सगर्हा इव ॥'**[5]

अत्र रावणः सीतीयाः सौन्दर्यादभिभूतः सन्, तस्याः लावण्यातिशयं त्रैलोक्येऽपि अद्वतीयदुर्लभमिति मत्वा अनुपमेयत्वं वर्णयति ।सीतायाः सौन्दर्यवर्णने राजशेखरेण अतीव कुशलता प्रदर्शितः वर्तते । बालरामायणे रावणः जानकीं वीक्ष्य कथयति- अल्पमुत्तोलयतव मुखं येन नभोऽयं द्विचन्द्रशोभितो भवेतेति । तद्यथा-

**रावणः- उदयञ्च मनाङ्मुखं भवतु च द्विचन्द्रं नभः ।**[6]तथा च -

कामज्वरेण पीडितः रावणस्य स्थितिं विवर्णयन् राजशेखरः चित्रशिखण्डस्यवचसा वर्णयति यत्-**सर्वावमानी दशाननः कथमवमाननां सहते ! किन्तु सीताविरह वैधुर्यमत्रापराद्धति । न विना हिमानीमचण्डो मार्तण्डः ।।** [7]

रावणस्य या शिथिलता वर्तते, या च अवमानना दृश्यते तस्य निमित्तं केवलं रावणस्य तीव्रकामेव,तस्मादेव सः स्वपराभवमपि नावलोकयति । एवं श्रृङ्गाररसवर्णनेन कविः सहृदयानां चित्तं हरति ।

**करुणरसस्य वर्णनम् –**

करुणरसवर्णने कविः भवभूतेः साक्षादवतारमिव व्यथां वर्णयति । रामस्य वनवासगमनात् व्यथितः दशरथः स्वहृदयस्य दुखं विलपन् कैकयीभरतयोः कलङ्कत्वं सूचयति । तद्यथा-

**नरेन्द्रो वृद्धः स्त्रीवश इति मयि न्यस्तमयशो**

**निषण्णा दौरात्म्येष्विति मलिनिता केकयसुता ।**

**मतं तस्याप्यस्मिन्निति च भरते लक्ष्म लिखितं**

---

[5]बालरामायण । १.४२

[6]तदेव ३.२५

[7]तदेव ३.पृ.सं-६६

**न जाने वा कोऽस्मिन् रघुकुलकलङ्केकविरभूत् ।।**[8]

**चरित्रचित्रणं-**

बालरामायणे खलनायकःरावणस्य चरित्रे नवीनता दृश्यते। सामान्य-रामकथासु रावणःदुष्टप्रवृत्तिः, अहंकारयुक्तः, दारुणाचारः इति चित्र्यते; परमत्र कविना रावणस्य प्रेमभावः अपि साक्षात्मानसगाम्भीर्ययुक्तः परिदर्शितः। तत्प्रेम न केवलं दैहिकसंवेगस्पर्शः,किन्तु मानसगह्वरसत्वावगाहिन्याः प्रकाशरूपं, तं प्रौढचरित्रत्वेन प्रतिष्ठापयति।एषा प्रस्तुति कथाप्रवाहे नवीनचित्रविचित्रता वहन्तः पाठकं चिन्तनाय प्रेरयति यद् खलनायकापि कदाचिद् हृदयगह्वराद् स्ववाक्यमुत्स्रजति।

बालरामायणस्य नायकः श्रीरामचन्द्रे समस्तसंभावित आदर्श गुणानां संचयः वर्तते । सः अत्यन्तः विनम्रः,क्षमाशीलः,परदुःखकातरः,अरिदमनकर्ता,चरित्रवान् धर्मरक्षकश्चास्ति। तत्र कथानके भगवतः परशुरामस्य प्रचण्डक्रोधे सत्यपि श्रीरामचन्द्रस्य चित्तं विनयभावापन्नं प्रशान्तं तिष्ठति। तदनु श्रीरामचन्द्रः विनयवनतः भूत्वा भार्गवस्य चरणकमलयोः निवेदयति च। तद्यथा-

**स्वायत्तेन कुठारेण स्वाधीने राममुर्धनि। यथेष्टं चेष्टतामार्यस्त्वदाज्ञां को निषेधति ।।** [9]

एषः विनयोत्कर्षेण एव दशरथनन्दनश्रीरामचन्द्रस्य मर्यादापुरुषोत्तमत्वं सिध्यति। अतः काव्यप्रकाशकारेण उक्तं-

**रामादिवत्प्रवर्तितव्यं न तु रावणादिवत्।** [10]

**उपसंहारः-**

यथाविस्तरं निरीक्ष्य ज्ञायते यल्लेखकस्य दृष्टिः केवलं पुराणकथाप्रस्तुतौ न स्थगिता, अपि तु तस्य वृत्तान्तः मानवीय-अन्तः संवेदनायाः नवीनप्राणवदङ्कितं । पात्राणां अन्तःस्थितप्रेरणा, निर्णयप्रक्रियाः, सुखदुःखविचाराः न केवलं कथाप्रवाहस्य उत्कर्षकाः,किन्तु हृदयान्तर्निहितानुभवबीजस्य, अंकुरवत् उपस्थापकाः एव वर्तते । अत्र लेखकेन काव्यकला मात्रंकलाचातुर्यप्रदर्शनाय नोपन्यस्ता,तया मानवजीवनस्य गूढतरसंवेदनामपि समुद्घाटिता। येन सहृदयः ग्रन्थपठनसमये प्रत्युत पात्रैः सह साक्षादात्मानमनुभूय हसति, विषीदति, रोदितीति।

अतः अस्य नाटकस्य मूल्यं साहित्ये,कौशलनिर्माणे, जीवनदर्शने, संवेदनार्जने, विचारोन्मेषे च निहितम्। आशासे कृतिरियं कालान्तरपर्यन्तमपि सहृदयेषु सजीवो भविष्यतीति विश्वासः।

**सन्दर्भग्रन्थसूची: -**

---

[8]तदेव ६.१५

[9]बालरामायणम् ४.६२

[10]मम्मट . काव्यप्रकाश

१. द्विवेदी, पी. नाट्य शास्त्र 1.116. वाराणसीः चौखम्भा सुरभारती प्रकाशन, 1995. प्रथम संस्करण।

२. गङ्गासागर राय, डॉ. बालरामायण 1.16. वाराणसीः चौखम्भा सुरभारती प्रकाशन, प्रथम संस्करण।

३. शर्मा ऋषि, उमाशंकर. संस्कृत साहित्य का इतिहास।

४.https://research-communications.cmpcollege.ac.in/wp-content/uploads/2023/07/25-Satya-Prakash-Srivastava-and-Janeshwar-Singh-FINAL-30.pdf

५. https://sanskritarticle.com/wp-content/uploads/9-23-Roman.Umre_.pdf

६. http://shabd-braham.com/ShabdB/archive/v2/i4/sbd-V2-i4-sn23.pdf

7. त्रिपाठी.प्रो राधावल्लभ (नो.डे) संस्कृत साहित्य का समग्र इतिहास।